
सत्यमेव जयते
न्यायविभागः
Department of Justice
भारतसर्वकारः
Government of India

# संविधान–दिवसः नागरिकाणां कर्तव्यानि च 26 नवम्बर. 2019 तः 26 नवम्बर. 2020 पर्यन्तम्



“ सविधानं नाम लेख्यपत्रं यदि केवलं सर्वकारेणैव अनुपालनीयं तिष्ठति, तदा लोकतन्त्रं व्यथिष्यते। अत एव मूलं यावत् प्रसरेद् एतत् इत्यावश्यकम्। ”


नरेन्द्रः मोदी
प्रधानमन्त्री

## भारतस्य संविधानम्

- भारतीयं संविधानं तादृशः मूलभूतः विधिः वर्तते यः अस्माकं राष्ट्रस्य आधारभूतं राजनैतिकं संघटनं निदधाति। संविधानम् एतद् हि संघीयेन संघटनेन सह एकं संसदीयलोकतन्त्रं गणराज्यं च स्थापयति ।
- भारतीयं संविधानम् अस्माकं संस्थापक–पूर्वजानां दूरदृष्टेः मूल्यानां च प्रतीकम् अस्ति। इदं तेषां सामाजिक–राजनैतिक–आर्थिकाणां विचाराणाम् आस्थायाः इच्छाशक्तेश्च प्रातिनिध्यं करोति।
- संविधानं कार्यपालिकां, विधायिकां न्यायपालिकां चेति इमानि भारतगणराज्यस्य प्रमुखानि अंगानि परिभाषते, परिभाषते च तेषां शक्तीः निर्धारयति च तेषाम् उत्तरदायित्वानि अपि ।
- भारतीयसंविधानस्य मूलभूतानि वैशिष्ट्यानि –
  - शासनस्य संसदीया प्रणाली
  - संघीया संरचना
  - सम्प्रदायनिरपेक्षं राज्यम्
  - स्वतन्त्रा न्यायपालिका
  - मौलिकाः अधिकाराः कर्तव्यानि च
  - राज्यस्य नीतिनिर्देशकाः सिद्धान्ताः
  - नागरिकता
  - वयस्क–मताधिकारः
- अमेरिका–ब्रिटेन–आयरलैण्ड–रूसादिदेशानां संविधानैः प्रेरणां प्राप्य रचितं भारतस्य संविधानं विश्वस्य दीर्घतमं विस्तृततमं च संविधानम् अस्ति।
- संविधाने 395 अनुच्छेदाः, 22 खण्डानि 12 अनुसूच्यः च सन्ति ।

“ भारतीयनागरिकेभ्यो गौरवं भारताय ऐक्यञ्च ”

नरेन्द्रः मोदी
प्रधानमन्त्री




भारतीयसंविधानस्य आवरणपृष्ठस्य आङ्ग्लभाषायां सुलेखनिर्मितप्रतिलिपिः।

संविधानस्य मूलपाण्डुलिपिः पार्चमेण्टपत्रेषु लिखिता आसीत्। 16x22 प्राङ्गुलपरिमितं यत्पत्रं सहस्रवर्षस्थायि भवति। सम्पूर्णतां गता पाण्डुलिपिः 251 पृष्ठैः 3.75 किलोग्राममितेन भारेण च युता आसीत् ।

# संविधान–सभा संविधानस्य संरचना च

( 1946 तमे वर्षे कैबिनेटमिशन–योजनायाः अन्तर्गतत्वेन स्थापितया) संविधानसभया 1946तम– 1949 तमयोः वर्षयोः मध्ये भारतीयसंविधानम् आलिखितम् । डा० राजेन्द्रप्रसादः इमां सभाम् अध्यक्षत्वेन असेवत ।

सभायाः 299 सदस्यैः (15 महिलाभिः सहितैः) संविधान–लेखने वर्षत्रयादपि न्यूनः (1946 तः 1949 पर्यन्तं) कालः यापितः ।

संविधानसभायाः सदस्याः 1946 तमवर्षस्य दिसम्बरमासाद् 1949 तमवर्षस्य नवम्बरमासं यावत् 11 उपवेशनसत्रेषु सममिलन् ।

29 अग० 1947 तमे खिष्टाब्दे डा० बी. आर. अम्बेडकरस्य अध्यक्षतायां संविधानसभा संविधाननिर्मात्रीं समितिम् एकां संविधानस्य प्रारूपनिर्माणाय अरचयत्।



1946 तमस्य वर्षस्य दिसम्बरमासस्य संविधानसभायाः सत्रम्।

“ आदरणीयस्य बाबासाहेब–अंबेडकरस्य नेतृत्वे भारतदेशः समावेशि संविधानं व्यरचयत् । समावेशि–संविधानमिदं नूतनभारत–संकल्पस्य अग्रदूतोऽस्ति। आत्मना सह इदम् अस्मभ्यं कानिचिद् उत्तरदायित्वानि आनयत् निरधारयच्च मर्यादाः अपि काश्चन अस्मदीयाः।" ”

नरेन्द्रः मोदी
प्रधानमन्त्री

“ संविधानं केवलम् अधिवक्तुः प्रलेखः न वर्तते, इदं जीवनस्य वाहनम् भवति, भवति चास्य भावना सदैव युगभावना। ”
डा. बी. आर. अम्बेडकरः



डा० बी. आर. अम्बेडकरस्य छायाचित्रम्



केन्द्रीय–केबिनेट्–सदस्याः भारत संविधानस्य उपरि हस्ताक्षरं कुर्वन्तः। राजकुमारी–अमृतकौर, जान् मथायः सरदार–बल्लभभाई–पटेलः चेति महाभागाः चित्रेऽस्मिन् दृश्यन्ते।

भारतस्य संविधानं 26 नव० 1949 तमे वर्षे अंगीकृतम् । इदं 26 जन० 1950 तमे वर्षे व्यवहारे आगतम्। तस्मिन्नेव दिने पर्यवसिता इयं संविधानसभा स्वतः अस्थायिसंसद्रूपेण आत्मानं पर्यणमयत् यावद् नवीना संसद् 1952 तमे वर्षे न संघटिता। संविधानस्य प्रारूपमधिकृत्य विहितेषु विमर्शेषु संविधानसभायाः पटले उपस्थापितानां 7635 संशोधनानां मध्ये 2473 संशोधनानि अग्रेसारितानि चर्चितानि निर्वर्तितानि च ।

299 सदस्येषु, 284 सदस्याः साक्षात् संविधाने स्वीयानि हस्ताक्षराणि अकुर्वन् ।

संविधानसभा संविधानरचनायाः विभिन्नानि कार्याणि सम्पादयितुम् आहत्य 13 समितीः अस्थापयत्। तासु अष्टौ समितयः वरीयस्यः शिष्टाः कनीयस्यः समितयः आसन् ।

संविधानसभायाः प्रमुखानाम् अष्टसमितीनां नामानि–

- प्रारूपनिर्मात्री समितिः
- संघ–शक्ति–समितिः
- संघ–संविधान–समितिः
- प्रान्तीय–संविधान–समितिः
- मौलिकाधिकाराणाम् अल्पसंख्यकानां जनजातीयानां तथा अपवर्जितानां क्षेत्राणां च कृते परामर्शदातृसमितिः।
- प्रक्रिया–नियम–समितिः
- राज्य–समितिः
- संचालन–समितिः



1950 तमे वर्षे जनवरीमासस्य 24 तम दिनाङ्कस्य अन्तिमे सत्रे संविधानसभायां सरदारबल्लभभाई–पटेलस्य उपस्थितिः।

संविधानसभा स्व्यकरोत् – 22 जु० 1947 तमे खिष्टाब्दे राष्ट्रियध्वजम् 24 जन० 1950 तमे खिष्टाब्दे राष्ट्रगानं राष्ट्रगीतञ्च।

आधुनिकानां भारतीयकलानां पथिकृत् श्रीनन्दलालबसुमहोदयः संविधानग्रन्थस्य प्रत्येकं पृष्ठस्य सीम्नाम् आकल्पनम् अकरोत्, अलमकरोत् चेदं विविधाभिः कलाकृतिभिः।

सुलेखकलायां कुशलः श्रीप्रेमबिहारिनारायणरायजादा एकाकी एव स्वहस्तेन संविधानम् अलिखत् । अस्य कार्यस्य पूर्णतायां षण्मासा यापिताः, तदर्थम् असौ किमपि शुल्कमपि न स्व्यकरोत्।



संविधानसभायाः सदस्यानां सामूहिकं चित्रम्, 1950

## संविधानसभा तस्याः प्रमुखसदस्याः च

संविधानसभायाः सदस्याः प्रान्तीयविधानसभाभिः अपरोक्षनिर्वाचनेन चिताः आसन्, यथा कैबिनेटमिशन इत्यनेन अनुसंशितमासीत् । संविधानसभायां 299 सदस्याः आसन्, येषु 229 प्रान्तानां 70 राज्यानां प्रतिनिधयः आसन् ।

संविधानसभायां सम्मिलिताः केचन प्रमुखसदस्याः–

| | | | | |
|---|---|---|---|---|
| डॉ० राजेन्द्रप्रसादः | आसफ अली | बेगम ऐज़ाज़ रसूल | पदमपत सिंघानिया | हरिसिंहः गौरः |
| सरदारः वल्लभभाईपटेलः | श्यामाप्रसादः मुखर्जी | के. एम. मुन्शी | पुरुषोत्तमदासः टंडनः | पंजाबरावः एस. देशमुखः |
| जवाहरलालः नेहरुः | हंसा मेहता | सर्वपल्लिराधाकृष्णन् | सुचेता कृपलानी | रविशंकरः शुक्लः |
| डॉ० बी.आर. अम्बेडकरः | गोपीनाथः बोरदोलोई | अम्मू स्वामीनाथन् | हसरत मोहानी | हरेकृष्णा महताब |
| गोविन्दबल्लभः पन्तः | हरेन्द्रकुमारः मुखर्जी | एम.अनंतशयनम् अयंगारः | रफी अहमद किदवई | एनी मस्कारीन |
| मौलाना अबुलकलाम–आज़ादः | बिनोदानन्दः झाः | अल्लादी कृष्णस्वामी अय्यरः | अनुग्रहनारायणः सिन्हा | जीवराजनारायणः मेहता |
| सरोजिनी नायडू | दुर्गाबाई देशमुख | बी.पट्टाभि सीतारमैय्या | जगजीवनरामः | मोटूरी सत्यनारायणः |
| राजकुमारी अमृत कौर | फ्रैंक एंथोनी | टी. प्रकाशम् | सच्चिदानन्दः सिन्हा | दीपनारायणः सिंहः |
| जे.बी. कृपलानी | जयपालसिंहः मुण्डा | एन.संजीव रेड्डी | सत्यनारायणः सिन्हा | सर सैयद मुहम्मद सादुल्ला |
| सी. राजगोपालाचारी | हरगोविन्दः पन्तः | एस. निजालिङ्गप्पा | श्रीकृष्णः सिन्हा | के. कामराजः |
| शरतचन्द्रः बोसः | जॉन मथाई | जी.वी. मावलंकरः | सेठगोविन्ददासः | पी.सुब्बारायणः |

I beg to move, Sir,

"That it be resolved that:

(1) After the last stroke of midnight, all members of the Constituent Assembly present on this occasion do take the following pledge:

'At this solemn moment when the people of India, through suffering and sacrifice, have secured freedom, I, ............. a member of the Constituent Assembly of India, do dedicate myself in all humility to the service of India and her people to the end that this ancient land attain her rightful place in the world and make her full and willing contribution to the promotion of world peace and the welfare of mankind.'

(2) Members who are not present on this occasion do take the pledge (with such verbal changes as the President may prescribe) at the time they next attend a session of the Assembly."

संविधानसभायाः सदस्यैः गृहीता प्रतिज्ञा ।

# नागरिकाः तेषां मौलिककर्तव्यानि च

अस्माकं संविधानस्य एकम् अपरिहार्य वैशिष्ट्यम्–



> " सम्यक् सम्पादितं कर्तव्यमेव अधिकारः। "
>
> महात्मा गान्धी

भारतसर्वकारः सर्वेषां भारतीयनागरिकाणां, तेषां मौलिककर्तव्यानां च विषये महतीं जागरूकतां संचारयितुं प्रत्येकं नागरिकेण सह सम्पर्कं कर्तुं चेष्टते। (26 नव० 2019 तः आरभ्य 26 नव० 2020 पर्यन्तम् )

प्रमुखानि उद्देश्यानि

- भारतीयान् प्रति पौनःपुन्येन व्याहरणं यत् ते संविधानस्य तन्निहितानां मूल्यानां सिद्धान्तानां च वास्तविकाः संरक्षकाः सन्ति।
- नागरिकेभ्यः परस्परं समाजं राष्ट्रं प्रति राष्ट्रियं गौरवम् अनुभवितुं स्वीयकर्तव्यानाम् अनुस्मारणम् ।
- नागरिकेषु राष्ट्रियभावनां प्रति गौरवानुभूतेः प्रोत्साहनम् ।
- राष्ट्रं प्रति अनुशासनस्य समर्पणस्य च भावनायाः प्रवर्धने साहाय्यसम्पादनम् राष्ट्रनिर्माणाय नागारिकाणाम् ऊर्जायाः उपयोजनं च ।

## नागरिकाणां कर्तव्यानि प्रति जागरूका भवेयुः

- भारतसंविधानस्य उद्देश्यिकां पठन्तु, अन्तर्जालके ऑनलाइन इति माध्यमेन प्रतिज्ञायाः उपरि हस्ताक्षरं कुर्वन्तु तथा च MyGov.in वेब्तन्त्रे तत्कालं प्रमाणपत्रं प्राप्नुवन्तु ।
- MyGov.in बेब्तन्त्रस्योपरि ऑनलाइन–माध्यमेन संविधानदिवससम्बद्धायां प्रश्नोत्तरप्रतियोगितायां निबन्धप्रतियोगितायाञ्च प्रतिभागित्वं कुर्वन्तु।
- www.doj.gov.in इत्यनेन भित्तिचित्राणि, विवरणिकाम् अन्याश्च उपलब्धाः सामग्रीः प्राप्नुवन्तु।

> " मम अनुरोधः अस्ति यद् भवन्तः न्यूनात् न्यूनम् एकं संकल्पम् अवश्यं कुर्वन्तु, राष्ट्रं प्रति स्वकीयानां कर्तव्यानाम् उत्तरदायित्वानां च विषये चिन्तयन्तु । कर्तव्यपथे संचरतां 130 कोटिकानां प्रयासानां संकल्पानां च शक्तिः देशाय भूयसे उपकाराय कल्पिष्यते "
>
> **नरेन्द्रः मोदी**
> **प्रधानमन्त्री**
> **स्वच्छभारतदिवसे 2019**

@DoJ_India तथा @MyGov. Join #itsmyduty इत्यस्योपरि अस्मान् अनुसरन्तु।

अधोलिखितस्य संकेतस्योपरि भारतसंविधानस्य मौलिक–कर्तव्यानां च सम्पूर्णं पाठं पश्यन्तु ।
http//legislative.gov.in/constitution-of-india

Department of Justice
Government of India
सत्यमेव जयते

# मौलिककर्तव्यानि – महत्त्वं परिवर्धनं च

> " अहं स्वकर्तव्यानि निजमातुः अङ्केऽशिक्षे। सा निरक्षरा ग्रामीणमहिला आसीत् ... सा मम धर्मं (कर्तव्यं) जानाति स्म। अत एव वयं यदि बाल्यकालादेव स्वकीयं धर्मं (कर्तव्यं) शिक्षामहे, अधिकाराः स्वयमेव आत्मानम् निभालयन्ति ..... एतस्य सौन्दर्यम् इदमस्ति यत् कर्तव्यस्य अनुपालना अस्मान् अस्माकं अधिकारान् च रक्षति। न अधिकाराः कर्तव्येभ्यः पृथक्कर्तुं शक्यन्ते। अनेन विधिना सत्याग्रहः प्रादुरभूत् यतो हि अहं सर्वदा एतत् निश्चेतुं प्रयते स्म यत् मदीयं कर्तव्यम् किं स्यात्। "
>
> 28 जून 1947 तमे ख्रिष्टाब्दे देहलीमहानगरे एकस्यां प्रार्थनासभायां मौलिककर्तव्यानां महत्त्वमधिकृत्य महात्मा गान्धी अकथयत्।–

अस्माकं संविधाने 11 मौलिकानां कर्तव्यानां समावेशनस्य पृष्ठभूमौ मूलविचारः अयम् आसीत् यत् जनैः अनुभूयमानानां मौलिकाधिकाराणां प्रतिदाने तेषाम् उत्तरदायित्वानि उपोद्बलनीयानि।

**मौलिकानि कर्तव्यानि सम्मानः गौरवं सहिष्णुता शान्तिः विकासः सद्भावश्चेति आधारभूतेषु मूल्येषु केन्द्रितानि सन्ति।**

1976 तमे वर्षे 42 तमेन संविधानसंशोधनविधिना यत् संविधानं प्रस्तावितं, तस्मिन् सन्निहितानि मौलिककर्तव्यानि राष्ट्रं प्रति नागरिकाणाम् आधारभूत–नैतिकाचरणानि अपरिहार्याणि कर्तव्यानि च निर्धारयन्ति।

**मौलिककर्तव्यानां समावेशनाय अनुशंसनार्थं निर्मिता काचित् समितिः व्याहरत् यत् तादृशानि पदानि आदातुम् आवश्यकानि, फलतः अधिकारान् अभ्यस्यन्तः नागरिकाः तेषां कर्तव्यानि न उपेक्षेरन् इति निश्चीयेत।**

बालकेभ्यः शिक्षावसरान् प्रदातुं 11तमं मौलिककर्तव्यं संविधानस्य 86तमेन संशोधनाधिनियमेन 2002तमे वर्षे संयोजितम्।

मौलिककर्तव्यविषयिणी प्रेरणा सोवियतसंघ–जापान–चीन–देशानां च संविधानेभ्यः अधिगता ।

अस्माकं (संविधानगतानि) मौलिककर्तव्यानि वस्तुतः भारतीयजीवनपथं पुरस्कुर्वतां कर्तव्यानां संहिताकरणम् अस्ति। तानि समाजं प्रति अनुशासनस्य प्रतिबद्धतायाश्च भावनां वर्धयन्ति।

मौलिककर्तव्यानि प्रत्येकं नागरिकं सततं स्मारयितुं अभिप्रेरकाणि सन्ति यदिदं संविधानं तेभ्यः निश्चितान् मौलिकाधिकारान् यच्छति, नागरिकाः निश्चितं लोकतान्त्रिकम् आचारान् व्यवहारान् च कुर्युः इत्यपि तदपेक्षते, यतो हि कर्तव्यानि अधिकाराश्च परस्परम् अयुतसिद्धानि भवन्ति।


> " लोकतन्त्रं न केवलं सर्वकारस्य किञ्चिद् रूपम् ... इदम् स्वकीयान् नागरिकबन्धून् अभिलक्ष्य सम्मानात्मकं श्रद्धात्मकम् एकं दृष्टिकोणम् अस्ति। "
>
> **बी.आर्. अम्बेडकरः**

> " सम्प्रति प्रत्येकं भारतीयः विस्मरेत् यत् सः राजपूतः, सिखः जाटः वा अस्ति स नूनं स्मरेत् यत् स केवलं भारतीयः अस्ति। स्वकीये देशे तस्य सर्वे अधिकाराः सन्ति किन्तु निश्चितैः कर्तव्यैः सहकृताः। "
>
> **सरदारः बल्लभभाईपटेलः**

नागरिकाः तेषां मौलिककर्तव्यानि च केवलं निजसक्रियसहभागित्वेन स्वकीयानां राष्ट्रियलक्ष्याणाम् अभिज्ञाने अस्माकं साहाय्यमाचरितुं शक्नुवन्ति।

1999 तमस्य ख्रिष्टाब्दस्य अक्टूबरमासे न्यायाधीशस्य वर्मणः अध्यक्षत्वे काचित् समितिः देशस्य नागरिकान् मौलिककर्तव्यानि शिक्षयितुं प्रस्तुतान् परामर्शान् अभिलक्ष्य एकं प्रतिवेदनं प्रास्तौत् ।

# संविधाने ( खण्डं IV-A, अनुच्छेदः 51A ) अन्तर्निहितानि 11 कर्तव्यानि।




अस्माकं संविधाने मौलिककर्तव्यानां योगः सार्वभौममानवाधिकारघोषणापत्रस्य अनुच्छेदेने 29 (1) सह इदं अनुबद्ध्नाति।

> " जीवनस्य अधिकारः तदैव सार्थकतां याति यदा वयं विश्वनागरिकरूपेण स्वकर्तव्यानि निर्वहामः। एकेनैव अनेन आधारभूतेन वचनेन नरस्य नार्याश्च कर्तव्यानि परिभाषितुं पर्याप्तं सुकरं स्याद्, अनेनैव च प्रत्येकम् अधिकारं तत्संगतेन केनचिद् कर्तव्येन तत्पूर्वाचरणीयेन सम्बद्धुमपि शक्येत। तदनन्तरम् अन्यान् अधिकारान् सबलम् आहर्तुं संघर्षः नापेक्ष्यते। "
>
> **महात्मा गान्धी**

मौलिककर्तव्यानि अधिकाराश्च च एकस्याः मुद्रायाः द्वे पार्श्वे स्तः।

महात्मा गान्धी अकथयत् यत् कर्तव्यस्य स्रोतः अधिकारः अस्ति । यदि वयं स्वकर्तव्यानि निर्वहामः, न अधिकाराः दूरे स्थास्यन्ति ।

लोकतन्त्रं तावत्पर्यन्तं समाजे दृढमूलं भवितुं नैव शक्नोति यावत् नागरिकाः स्वकीयैः मौलिकाधिकारैः सह स्वकीयानां मौलिककर्तव्यानां समादरं न कुर्युः।

प्रत्येकम् अधिकारः आत्मना संयुक्तं सद् एकं कर्तव्यम् आवहति। एकस्य नागरिकस्य सम्यक् सम्पादितं कर्तव्यमेव अन्येषाम् अधिकारान् सुनिश्चिनोति ।

यदा वयं स्वकर्तव्यानि अनुपालयामः तदा निजाधिकाराणां स्वाम्यं धारयामः ।